CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 214

Title Fragm Subodhini on Mitakṣarā

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 214 Subject: Dharmaśāstra.

Duhitṛ Dhanagrahaṇādhikāra

Title: [illegible] Subodhinī on Mitākṣarā.

Author: Viśveśvara. Scribe: Lakṣmī Jha

Date of the work: —— Date of the Ms.: ——

Place of the work: —— Place of the Ms.: ——

Size: 7·2" × 4·6" Extent: 10 foll.

Language: Sanskrit Script: Devanāgarī.

Remarks: incomplete. The ms. was

[illegible]

स्यपौत्रपत्न्या

अथापुत्रमृतस्य स्नुषादुहित्रोः समवाये
दुहितुर्धनग्रहणाधिकारनिर्णयः पत्र १२

::।। ।।केनचित्पुरुषेण स्वपितुर्मरणानंतरं तदुपार्जितग्रामस्य
दायत्वेनार्द्धांशः प्राप्तस्तन्मरणानंतरं तत्पुत्रेण सोंऽशः प्राप्त (।।
(स च मूलपुरुषस्य पौत्रः) तस्मिन् पौत्रे जीवति तस्य पौत्रस्य पुत्र
स्तमनु पौत्रश्चोभौ तेन स्वपित्रा पितामहेन चाविभक्तौ मृतौ ।।
मृतस्य पौत्रस्य पत्नी अथ च स्वस्य दुहिता तस्याः पुत्राश्चत्वश्च व स्त्रयः
र्तंते ।। एवं स्थिते मूलपुरुषस्य पौत्रौ नष्टस्तदा मृतस्य मूलपुरु १
षपौत्रस्य पूर्वो ... ायग्रहणाधिकारो धर्मशास्त्रप्रमा

णेन मृतस्य तस्य पौत्रपत्न्या अस्ति किंवा मृतस्य दुहितुर्दौहि
त्राणां चास्ति ।। यदि च पौत्रपत्न्या दायग्रहणाधिकारो अस्ति
चेत्तदा तत्र तस्याः पौत्रपत्न्याः कियती स्वतंत्रता ऽस्ति ।। यदि
च दुहितुर्दौहित्राणां च तद्दायग्रहणाधिकारोऽस्ति चेत्तदा त
स्माद्दायात् पौत्रपत्न्याः कियान् ग्राह्यांशोऽस्तीत्यनुयोगः।। ।।
उत्तरम् ।। अत्रेदं विचार्यं। यस्याः पतिः स्वपितुर्मरणानंतरं
पितामहे च जीवति अपुत्रो मृतः तस्य प्रपितामहक्रमायात

तेपितामहेनसहाविभक्तेधनेस्वजीवद्दशायांसाधारणंस्वत्वम
भूत् तत्स्वत्वंतन्मरणानंतरंतत्पत्न्यावर्त्ततेनवेति॥ तत्रैतादृशे
धनेयत्पतिस्वत्वंतत् तन्मरणानंतरंतत्पत्न्यावर्त्तते एतत्त्वनिपा
दकंवचनंवाग्रंथकर्त्तुर्व्याख्यामिताक्षरामयूखमनुस्मृतीषुन
च दृश्यते॥ यानि, आम्नायेस्मृतितंत्रेचेत्यादीनिबृहस्पत्यादिवच
नानि। अपुत्राशयनंभर्त्तुरितिमनुवचनंच। मनुस्मृतिमिता २
क्षरादिषुग्रंथकृद्भिर्विभक्तपत्युरसाधारणद्रव्येपत्न्या अधिका

रेसाधकतयाउपन्यस्तानितस्मात्तानितद्विषयाण्येवअविभ
क्तविषयाणिनभवंतिअन्यथाअविभक्तभ्रात्रादीनांमध्येक
स्यचिदपुत्रस्यस्वर्यातस्यपत्न्याअपिअविभक्तधनेविभागग्र
हआपद्येत-सचसर्वग्रंथासंमतोऽतोविभक्तापुत्रमृतभर्तृध
नेपूर्वोक्तैर्वचनैःपत्न्याःस्वत्वंसिध्यति, अन्यच्चमिताक्षरायां
पाणिग्रहणाद्धिसहत्वंकर्मसुतथापुण्यापुण्यफलेषु इति
गौतमवाक्येनपाणिग्रहणादारभ्यआधानसिद्धाग्निसा

ध्यकर्मसुविवाहसिद्धाग्निसाध्येषुकर्मसुच दंपत्योः सहाधि
कारः येषुपुण्यकर्मसुसहाधिकारस्तेषां फलेषुसहत्वं· द्रव्यस्वा
मित्वेपि सहत्वमुक्तं यस्माद्द्रव्य दारिग्रहेषुचेत्युक्त्वा तत्र कारण
मुक्तं· भर्त्तुर्विप्रवासे नैमित्तिके अवश्यकर्त्तव्ये दाने अतिथि
भोजनभिक्षादानादौहि यस्मान्नस्तेयमुपदिशंति मन्वादयः
तस्माद्भार्याया अपि द्रव्यस्वामित्वमस्ति अन्यथा स्तेयं स्यादि
ति मिताक्षराकारैर्व्याख्यातं तदवलंबनेन पतिमरणानं ३

तरमविभक्ते तदीयधने तत्पत्न्याः स्वत्वं वर्त्तते इति कल्प्यते
पितामहादिद्रव्ये पितुः पुत्रस्योभयोर्जन्मना स्वत्वं मिताक्षरा
दौ उक्तं तदतिदेशेन तत्पत्न्योरपि तथैव तत्स्वत्वं वर्त्तते इति
कल्पनया अतिदेशेन च प्रकृते पौत्रपत्न्याः स्वत्वं संभाव्यते
परंतु विरमित्रोदयकारैरस्मिन्नेव विषये एतद्गौतमवचन
मुपन्यस्य विस्तरतो व्याख्यातं तत्रत्यं तात्पर्यमात्रं प्रकृतोप
युक्तं सूच्यते· पाणिग्रहणादिति गै न वचनात्तत्पत्न्या

अपितद्भागेअविभक्तेपिस्वत्वमुत्पन्नंतन्नाशःकिमितिक
ल्प्यतेइतिचेत्‌नपत्न्याःपतिद्रव्येक्षीरनीरवदेकलोलीभा
वापन्नं·सहाधिकारीकर्मोपयोगीनतुभ्रातृणामिवपरस्प
रं·ततएवतेषांविभागोनतुजायापत्योःएतन्न्यायमूलकमे
वजायापत्योर्नविभागोविद्यतेइतिवचनं तथाचपत्युःस्व
त्वापगमेतस्याःस्वत्वापगमस्तत्रावश्यकः एवंचाविभक्त
संसृष्टिपितिस्थापनेयेपत्न्यास्वत्वोत्पत्तिकल्पनामविभक्त ४

संसृष्टिस्वस्यसतोऽसाधारण्यंचेतिदीक्षायामुत्तरपक्षक
क्षीकरणमेवोचितंलाघवात्‌·नचपत्न्येवविभागप्रतियो
गिनीप्रापकप्रमाणाभावात्‌नचतान्येववचनानिप्राप
काणितेषांविषयविषयविवादाद्विभक्तासंसृष्टिविषय
त्वेनाप्युपपत्तेरिति·विस्तरश्चैतद्ग्रंथेद्रष्टव्यः एवंचैतादृशीं
ग्रंथकारव्याख्यामनादृत्ययुक्त्याअतिदेशेनाविभक्तासृ पत्र
तपनिधनेपत्न्याःस्वत्वकल्पनमस्मदादीनामनुचितं·

निबंधकर्त्रपेक्षया इतरेषादीनां लाघवात् किंच अविभक्त
भ्रात्रादीनां मध्ये कस्यचिद् पुत्रस्य मरणे तत्पत्न्या अथ च
क्लीबादिपत्नीनां चाविभक्ते धने जीवत्स्वपि पतिपुत्रत्वना
शस्य सर्वग्रंथेषूक्तत्वात् अतः चिरमित्रोदयस्तद्ग्रंथैरविरु
द्ध एवेति भाति एवं च केवल शास्त्रदृष्ट्या विचार्यमाणे तु
अविभक्तपतिमरणे तत्स्वत्वनाशेन तत्पत्न्या अपि स्वत्वं
नष्टमिति स्थितं एवं चाविभक्तभ्रात्रादिस्थले मृतभर्तृ ५
कपत्न्याः स्वत्वनाशः सर्वैरभ्युपेयत्वेन तन्न्यायसाम्यात्

प्रकृतेपि पितामहे जीवति पितृनाशपूर्वक पौत्रस्य मर
णे अविभक्तधने पौत्रस्वत्वस्य नष्टत्वेन तत्पत्न्या अपि स्व
त्वनाशे क्रमायात धने जीवतः पितामहस्य इतरस्वत्वा
नपरुद्धं स्वत्वं जातं न चाविभक्तभ्रातृस्थले क्रमायात
धने मृतभर्तृकायाः स्वत्वं गच्छति अन्यत्र तु न गच्छतीत्य
त्र प्रमाणाभावं इत्यलं विस्तरेण ननु पत्नी दुहितरश्चै
वेत्यादि योगीशवचने पत्नीपदं पुत्रपत्नी पौत्रपत्न्यो

रूपलक्षणं॰ यथा अस्मिन्नेव वाक्ये अपुत्रपदं पुत्रपौत्रा
भाववत उपलक्षणं तथा पत्नीपदमिति। तदनुसरणेन
लोकप्रसिद्धाशितिः स्नुषादिसत्वेऽन्यो धनं न गृह्णातीति
किंच निर्णयसिंधावौ श्राद्धाधिकारिनिरूपणे पृथ्वीचं
द्रोदये वृद्धमनुः स्नुषा स्वस्त्रीयतत्पुत्रज्ञातिसंबंधिबां
धवाः पुत्राभावे तु कुर्वीरन्सपिंडांतं यथाविधीति॰ पु
त्रशिष्योऽथवा पत्नी पिता भ्राता स्नुषा गुरुः। स्त्री हारीध ६

न हारी च कुर्यात्पिंडोदकक्रियामिति कार्ष्णाजिनिवचनं।
पत्नी भ्राता च तज्जश्च पिता माता तथा स्नुषा॥ भगिनी भा
गिनेयश्च सपिंडः सोदकस्तथेति हारितवचनं॥ इत्यादि
वचनैः स्नुषायाः श्राद्धकरणाधिकारित्वेन पिंडदातृत्वे व्य
क्ते यश्चार्थहरः स पिंडदायी स्यापस्तंबवचनेन च पूर्वोक्त
उपलक्षणेन च प्रकृते मृतस्य पौत्रपत्न्या धनग्रहणाधि
कारो न सपुत्रदुहितुरिति। अत्रोच्यते॰ पत्नीदुहितरश्चे

अपुत्रप
दयतर

चेत्यत्र पत्नीपदं पुत्रपत्नीपौत्रपत्न्योरुपलक्षणमित्याशंकि
तं तन्न युक्तं· कुतः पत्नी दुहितरश्चैवेत्यादिवाक्ये श्रूयमाण
मपुत्रपदं पुत्रपौत्राभाववतोउपलक्षणमिति निबंधकृद्भि
रुक्तं तत्तु पुत्रपौत्रैर्ऋणं देयमिति योगीशवचने पुत्रपौत्रै
रिति निर्देशमूलकैव निबंधकाराणामुपलक्षणोक्तिः पत्नी

बीजाभाव
द २

पदस्योपलक्षणे तु निर्मूलत्वेनैव निबंधकृद्भिरनुक्तत्वा ७
त्· अन्यच्च पत्नीपदस्योपलक्षणकल्पने श्राद्धाधिकारि

निर्णये· पत्नी भ्राता च तज्जश्चेत्यादिहारितादिवचनेषु पत्नी
पदेन पत्न्यधिकारस्योक्तत्वेन तत्रापि लाघवात् पत्नीपदस्यो
पलक्षणेन स्नुषा तत्स्नुषयोः संग्रहे जाते एतेषु वाक्येषु क्वचि
न्मात्रनंतरं क्वचिच्च भ्रात्रनंतरं स्नुषायाः पृथङ्निर्देशः कृतः
स न कर्त्तव्यः स्यात् ॥ तच्चस्पष्टार्थं पृथङ्निर्देशोऽथवा तन्मू
लकमेव पत्नी दुहितरश्चैवेत्यत्र पत्नीपदं स्नुषादेरुपलक्ष
णमिति वाच्यं। पत्नी दुहितरश्चैवेत्यत्र यदुपलक्षणं चेत्

पत्न्यभावेस्नुषायास्तदभावेनस्नुषायाधनग्रहाधिकारः
स्नुषादेरभावेचदुहित्रादीनांधनग्रहाधिकारःस्यात्.एवं
चसतिहारितादिवचनेषुस्नुषायाःश्राद्धाधिकारस्तुपितृ
भ्रातृभ्रातृव्यपितृमात्रनंतरमुक्तः धनाधिकारस्तुतन्मूल
कोपलक्षणकल्पनयापत्न्यभावाऽव्यवहितःस्नुषायाउ
च्यतेइति अधिकारस्थाननिवेशनवैलक्षण्येविनिग ८
मनाविरहात् पत्नीपदस्यस्नुषादावुपलक्षणकल्पना

अयुक्तैवातःश्राद्धाधिकारेस्नुषायाःपृथङ्निर्देशस्यस्पष्टार्थ
त्वोक्तिरप्यसंगतैवेति.किंचस्नुषायाःश्राद्धाधिकारोय
थाहारितादिवचनेषूक्तस्तथा पुत्रधनग्रहाधिकारिक्र
मेस्नुषायानत्स्नुषायाश्चानुक्तत्वात्पूर्वोक्तयुक्त्यापत्नीपद
स्योपलक्षणकल्पनस्याशक्यत्वाच्चपत्नीदुहितरइत्य
त्रपत्नीशब्दस्योपलक्षणतयादुहित्रादौसत्त्वेपत्न्यभा
वाव्यवहितस्नुषादेर्धनग्रहाधिकारकल्पनंनैवसुसं[illegible]।

इत्थं शास्त्रं दृष्ट्वा॥ विचार्यमाणे प्रकृते पुत्रपौत्रमरणानंत
रं पितामहे मृते तदीयस्वत्वास्पदीभूतपरंपरायात धनग्र
हाधिकारः॥ मिताक्षरायां पत्नीदुहितरश्चैव पितरौ
भ्रातरस्तथा॥ तत्सुता गोत्रजा बंधुशिष्यसब्रह्मचारिणः॥
एषामभावे पूर्वस्य धनभागुत्तरोत्तरः॥ स्वर्यातस्य ह्यपु
त्रस्य सर्ववर्णेष्वयं विधिरिति याज्ञवल्क्यः॥ अंगादंगा ६
त्संभवति पुत्रवद्दुहिता नृणां॥ तस्यामात्मनि तिष्ठंत्या

इति मिताक्षरायां व्यवहारमयूखादौ च याज्ञवल्क्य बृहस्पति विष्ण्वा
दिवचनैस्तदीय दुहितृदौहित्राणां चैवास्ति न तु पौत्रपत्न्याः॥ मातु

कथमन्यो धनं हरेत् इति बृहस्पतिवचनं॥ यथाह विष्णुः
अपुत्रपौत्रसंताने दौहित्रा धनमाप्नुयुः॥ पूर्वेषां तु स्वधा
कारे पौत्रा दौहित्रका मताः॥ स्वर्याते स्वामिनि स्त्री तु
ग्रासाच्छादनभागिनी॥ अविभक्ते धनांशे तु प्राप्नोत्या
मरणांतिकमिति कात्यायनवचनात् ग्रासाच्छादनमा
त्रमेव साक्षाल्लभते आमरणांतिकं यावज्जीवं याव
ता धनेन जीवनं स्यादधिकारिकमावश्यकं कर्म सिध्यति

तायंतं धनांशं वा प्राप्नोतीति वीरमित्रोदयकारः ।। अपु
त्रस्य मृतस्य पौत्रस्य पत्नीदुहितृदौहित्राणां समवाये धनग्र
हणाधिकारनिर्णयः ।। ।। ।। पायगुंडोपाह्वयलक्ष्मीदेवकृत
मिताक्षराटीकायां सुबोधिन्यां याऽपुत्रस्य स्वर्यातस्य पु पौत्रस्य पत्नी
दुहितृसमवाये दुहितुरेव धनग्रहणाधिकारः इति सिद्धांतितम् ।।
तच्चैवम् ।। अपुत्रधनं पत्न्यभिगामि तदभावे दुहितृगामीति प्रागुक्तम् ।।
विष्णुरपि ।। दुहितृणामभावे तु सकल्यपुत्रेषु तद्धनम्मिति ।। कात्यायनोऽपि